# Mayureshvara Stotram

# મયૂરેશ્વરસ્તોત્રમ્

## Document Information

Text title : mayureshvarastotram all the Gods praised Ganesha

File name : mayuureshvarastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, Preeti Bhandare

Description-comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 123 | 2.123 40-57||

Latest update : May 12, 2004, April 18, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 18, 2024

*sanskritdocuments.org*

# મયૂરેશ્વરસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
સર્વે ઉચુઃ ।
પરબ્રહ્મરૂપં ચિદાનન્દરૂપં પરેશં સુરેશં ગુણાબ્ધિં ગુણેશમ્ ।
ગુણાતીતમીશં મયૂરેશવન્દ્યં ગણેશં નતાઃ સ્મો નતાઃ સ્મો નતાઃ સ્મઃ ॥ ૧॥
(પરબ્રહ્મરૂપં ચિદાનન્દરૂપં સદાનન્દરૂપં સુરેશં પરેશમ્ ।
ગુણાબ્ધિં ગુણેશં ગુણાતીતમીશં મયૂરેશમાદ્યં નતાઃ સ્મો નતાઃ સ્મઃ ॥)

જગદ્વન્દ્યમેકં પરાકારમેકં ગુણાનાં પરં કારણં નિર્વિકલ્પમ્ ।
જગત્પાલકં હારકં તારકં તં મયૂરેશવન્દ્યં નતાઃ સ્મો નતાઃ સ્મઃ ॥ ૨॥

મહાદેવસૂનું મહાદૈત્યનાશં મહાપૂરુષં સર્વદા વિઘ્નનાશમ્ ।
(મહેશાદિદેવૈઃ સદા સેવ્યપાદં સદા રક્ષકં યોગિનાં ચિત્સ્વરૂપમ્ ।)
સદા ભક્તપોષં પરં જ્ઞાનકોશં મયૂરેશવન્દ્યં નતાઃ સ્મો નતાઃ સ્મઃ ॥ ૩॥

અનાદિં ગુણાદિં સુરાદિં શિવાયા મહાતોષદં સર્વદા સર્વવન્દ્યમ્ ।
સુરાર્યન્તકં ભુક્તિમુક્તિપ્રદં તં મયૂરેશવન્દ્યં નતાઃ સ્મો નતાઃ સ્મઃ ॥ ૪॥

પરં માયિનં માયિનામપ્યગમ્યં મુનિધ્યેયમાકાશકલ્પં જનેશમ્ ।
અસઙ્ખ્યાવતારં નિજાજ્ઞાનનાશં મયૂરેશવન્દ્યં નતાઃ સ્મો નતાઃ સ્મઃ ॥ ૫॥

અનેકક્રિયાકારકં શ્રુત્યગમ્યં ત્રયીબોધિતાનેકકર્માદિબીજમ્ ।
ક્રિયાસિદ્ધિહેતું સુરેન્દ્રાદિસેવ્યં મયૂરેશવન્દ્યં નતાઃ સ્મો નતાઃ સ્મઃ ॥ ૬॥

મહાકાલરૂપં નિમેષાદિરૂપં કલાકલ્પરૂપં સદાગમ્યરૂપમ્ ।
જનજ્ઞાનહેતું નૃણાં સિદ્ધિદં તં મયૂરેશવન્દ્યં નતાઃ સ્મો નતાઃ સ્મઃ ॥ ૭॥

મહેશાદિદેવૈઃ સદા ધ્યેયપાદં સદા રક્ષકં તત્પદાનાં હતારિમ્ ।
મુદા કામરૂપં કૃપાવારિધિં તં મયૂરેશવન્દ્યં નતાઃ સ્મો નતાઃ સ્મઃ ॥ ૮॥

સદા ભક્તિં નાથે પ્રણયપરમાનન્દસુખદો
(સદા ભક્તાનાં ત્વં પ્રસભપરમાનન્દસુખદો (પ્રભસપરમાનન્દસુખદો))

યતસ્ત્વં લોકાનાં પરમકરુણામાશુ તનુષે ।
ષડૂર્મીનાં વેગં સુરવર વિનાશં નય વિભો
તતો ભક્તિઃ શ્લાઘ્યા તવ ભજનતોઽનન્યસુખદાત્ ॥ ૯॥ (તતો મુક્તિઃ, ભજનતોઽનન્તસુખદાત્ )

કિમસ્માભિઃ સ્તોત્રં ગજવદન તે શક્યમતુલં
વિધાતું વા રમ્યં ગુણનિધિરસિ પ્રેમ જગતામ્ ।
ન ચાસ્માકં શક્તિસ્તવ ગુણગણં વર્ણિતુમહો
ત્વદીયોઽયં વારાં નિધિરિવ જગત્સર્જનવિધિઃ ॥ ૧૦॥

ફલશ્રુતિઃ ।
કઃ ઉવાચ ।
એવં સ્તુત્વા પુનસ્તેઽમું પ્રાર્થયામાસુરાદરાત્ ।
યદુક્તં તે મયૂરેશ ! તત્કૃતં પરમં વચઃ ॥ ૧૧॥

સર્વેષાં સુરસઙ્ઘાનામવધ્યોઽયં હતોઽસુરઃ ।
તતોઽગાત્ પાર્વતી તત્ર જહૃષે ચાલિલિઙ્ગ તમ્ ॥ ૧૨॥

શિવોઽપિ પ્રયયૌ તત્ર સમાલિઙ્ગ્ય તમબ્રવીત્ ।
સમ્યક્ કૃતં ત્વયા વત્સ ! ત્રૈલોક્યં હર્ષનિર્ભરમ્ ॥ ૧૩॥

સિન્ધોર્વધઃ સર્વસુરૈરસાધ્યો ન ચ તે શ્રમઃ ।
પરાક્રમવતઃ સર્વલોકરક્ષારતસ્ય ચ ॥ ૧૪॥
ચતુર્વેદાઽનિરુપ્યસ્ય સર્વવિદ્યાનિધેરપિ ।
એવમુક્ત્વા ગતાસ્તે તુ સર્વે સ્વસ્થાનમાદૃતાઃ ॥ ૧૫॥

મયૂરેશં નમસ્કૃત્ય તતો દેવાબ્રુવઁશ્ચ તમ્ ।
ઇદં યઃ પઠતે સ્તોત્રં સ કામાઁલ્લભતેઽખિલાન્ ॥ ૧૬॥

સહસ્રાવર્તનાત્ કારાગૃહસ્થં મોચયેજ્જનમ્ ।
અયુતાવર્તનાન્મર્ત્યોઽસાધ્યં યત્ સાધયેત્ ક્ષણાત્ ॥ ૧૭॥

સર્વત્ર જયમાપ્નોતિ શ્રિયં પરમદુર્લભામ્ ।
પુત્રવાન્ધનવાઁશ્ચૈવ વશતામખિલં નયેત્ ॥ ૧૮॥

variation
કિમસ્માભિઃ સ્તોત્રં સકલસુરતાપાલક વિભો
વિધેયં વિશ્વાત્મન્નગણિતગુણાનામધિપતે ।
ન સઙ્ખ્યાતા ભૂમિસ્તવ ગુણગણાનાં ત્રિભુવને

ન રૂપાણાં દેવ પ્રકટય કૃપાં નોઽસુરહતે ॥ ૧૦॥

મયૂરેશં નમસ્કૃત્ય તતો દેવોઽબ્રવીચ્ચ તાન્ ।
ય ઇદં પઠતે સ્તોત્રં સ કામાન્ લભતેઽખિલાન્ ॥ ૧૧॥

સર્વત્ર જયમાપ્નોતિ માનમાયુઃ શ્રિયં પરામ્ ।
પુત્રવાન્ ધનસમ્પન્નો વશ્યતામખિલં નયેત્ ॥ ૧૨॥

સહસ્રાવર્તનાત્કારાગૃહસ્થં મોચયેજ્જનમ્ ।
નિયુતાવર્તનાન્મર્ત્યો સાધ્યં યત્સાધયેત્ક્ષણાત્ ॥ ૧૩॥

ઇતિ શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ત્રયોવિંશત્યુત્તરશતતમોઽધ્યાયે
મયૂરેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૧૨૩ । ૨.૧૨૩ ૪૦-૫૭॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 123 . 2.123 40-57..

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)
and Amith K Nagaraj (amithkn@rediffmail.com)
Proofread by Ravin Bhalekar ravibhalekar@hotmail.com, Preeti Bhandare

---

*Mayureshvara Stotram*
pdf was typeset on April 18, 2024

Please send corrections to *sanskrit@cheerful.com*